# રુદ્રાષ્ટકમ્

નમામીશમીશાન નિર્વાણરૂપમ્ ।
વિભુમ્ વ્યાપકમ્ બ્રહ્મ વેદસ્વરૂપમ્ ॥
નિજમ્ નિર્ગુણમ્ નિર્વિકલ્પમ્ નિરીહમ્ ।
ચિદાકાશમાકાશવાસમ્ ભજેઅહમ્ ॥ ૧ ॥

નિરાકારમોકારમૂલમ્ તુરીયમ્ ।
ગિરા ગ્યાન ગોતીતમીશમ્ ગિરિશમ્ ॥
કરલમ્ મહાકાલ કાલમ્ કૃપાલમ્ ।
ગુણાગાર સંસારપારમ્ નતોઅહમ્ ॥ ૨ ॥

તુષારાદ્રિ સંકાશ ગૌરમ્ ગભીરમ્ ।
મનોભૂત કોટિપ્રભા શ્રી શરીરમ્ ॥
સ્ફુરન્મૌલિકલ્લોલિની ચારુગંગા ।
લસદભાલબાલેન્દુ કંન્ઠે ભુજંગા ॥ ૩ ॥

ચલત્કુંન્ડલમ્ ભ્રૂસુનેત્રમ્ વિશાલમ્ ।
પ્રસન્નાનનમ્ નીલકંન્ઠા દયાલમ્ ॥
મૃગાધીશચર્મામ્બરમ્ મુન્ડમાલમ્ ।
પ્રિયમ્ શંકરમ્ સર્વનાથમ્ ભજામિ ॥ ૪ ॥

પ્રચન્ડમ્ પ્રકૃષ્ટમ્ પ્રગલ્ભમ્ પરેશમ્ ।
અખંન્ડમ્ અજમ્ ભાનુકોટિપ્રકાશમ્ ॥
ત્રયઃ શૂલ નિર્મૂલનમ્ શૂલપાણિમ્ ।
ભજેઅહમ્ ભવાનીપતિમ્ ભાવગમ્યમ્ ॥ ૫ ॥

કલાતીત કલ્યાણકલ્પાન્તકારી ।
સદા સજ્જનાનન્દદાતા પુરારી ॥
ચિદાનન્દ સન્દોહ મોહાપહારી ।
પ્રસીદ પ્રસીદ પ્રભો મન્મથારી ॥ ૬ ॥

ન યાવદ્ ઉમાનાથ પાદારવિન્દમ્ ।
ભજન્તીહ લોકે પરે વા નરાણામ્ ॥
ન તાવત્સુખમ્ શાન્તિ સન્તાપનાશમ્ ।
પ્રસીદ પ્રભો સર્વભૂતાધિવાસમ્ ॥ ૭ ॥

ન જાનામિ યોગમ્ જપમ્ નૈવ પૂજામ્ ।
નતોઅહમ્ સદા સર્વદા શમ્ભુ તુભ્યમ્ ।।
જરાજન્મ દુઃખૌઘ તાતપ્યમાનમ્ ।
પ્રભો પાહિ આપન્નમામીશ શમ્ભો ।। ૮ ।।

રુદ્રાષ્ટકમિદમ્ પ્રોક્તમ્ વિપ્રેણ હરતુષ્ટયે ।
યે પઠન્તિ નરા ભક્ત્યા તેષામ્ શમ્ભુઃ પ્રસીદતિ ।। ૯ ।।

*********